International Journal of Sanskrit Research 2023; 9(6): 143-151

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(6): 143-151
© 2023 IJSR
www.anantaajournal.com
Received: 03-10-2023
Accepted: 04-11-2023

अनिमेषरायः
शोधछात्रः
श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयः, केरल, भारत

**Corresponding Author:**
अनिमेषरायः
शोधछात्रः
श्रीशङ्कराचार्यसंस्कृतविश्वविद्यालयः, केरल, भारत

# श्रीशङ्कराचार्यविरचितप्रश्नोत्तररत्नमालिकायाम् अद्वैततत्वविचारः।

अनिमेषरायः

**DOI:** https://doi.org/10.22271/23947519.2023.v9.i6c.2259

सारांश
प्रश्नोत्तररत्नमालिका इति श्रीशङ्करभगवत्पादैः विरचितः एकः स्तोत्रात्मकः ग्रन्थः। शिष्याणां सन्मार्गे एव प्रवृत्तिः स्यात् इति सन्मार्गोपदेशपुरस्सरं शिष्येषु आगतस्य प्रश्नस्य समाधानरूपेण प्रश्नोत्तरक्रमेण उपदेशात्मिकाः कारिकाः सङ्कलिताः दृश्यन्ते ग्रन्थकारैः अस्मिन् ग्रन्थे। अत्र अद्वैतशास्त्रतत्वं तथा च प्रस्थानत्रयभाष्ये वक्तुम् अशक्याः लौकिकाः विषयाः अपि स्तोत्रमाध्यमेन भाष्यकारैः सूचिताः सन्ति। विशेषतया अद्वैततत्वस्यैव प्रतिपादनं विहितं दृश्यते ।

कूटशब्दः अनुवन्धचतुष्टयनिरूपणम्, गुरुस्वरूपम्, ज्ञानस्य मोक्षहेतुत्वनिरूपणम्, ब्रह्मणः संसारसारत्वम्, तपसः मोक्षसाधनत्वम्, अविद्यास्वरूपनिरूपणम्, जाग्रद्व्यवहारस्य स्वप्नसदृशत्वम्, ब्रह्मणः सत्यत्वम्, प्रपञ्चस्य मिथ्यात्वम्, द्वैतस्य कल्पिततत्वम्, अद्वैतस्य पारमार्थिकत्वम्, अज्ञानस्य अनादित्वम्।

## प्रस्तावना

यथा अस्य ग्रन्थस्य आदौ [1]"कः खलु नालङ्क्रियते दृष्टादृष्टार्थसाधनपटीयान्" इति प्रथमकारिकया अनुबन्धचतुष्टं प्रतिपादितमस्य ग्रन्थस्य। किञ्च वेदान्तशास्त्रस्यापि अनुबन्धचतुष्टयम् अनेनैव श्लोकेन प्रतिपादितम् दृश्यते।तथा च कः गुरुः स्यात् इति प्रश्ने सति उच्यते अधिगततत्वः शिष्यहितायोद्यतः सततं सः गुरुः इति।यैः शास्त्रविषयकतत्वानि सम्यग्रूपेण अधिगतानि प्राप्तानि धारणया सः गुरुः। मुण्डकोपनिषदि प्रथममुण्डके उच्यते,- [2] "सः गुरुमेवाभिगच्छेत् श्रोत्रियं ब्रह्मनिष्ठम्" इति। यः गुरुः सः कीदृशः इति चेत् उच्यते श्रोत्रियः ब्रह्मनिष्ठः

[1] कारिकासंख्या १, प्रश्नोत्तररत्नमालिका
[2] "सः गुरुमेवाभिगच्छेत् श्रोत्रियं ब्रह्मनिष्ठम्" ( मुण्डकोपनिषत् १/२/१२)

इति। एवञ्च [3] "किं संसारे सारं ? बहुशोऽपि विचिन्त्यमानमिदमेव" इत्यादिकारिकया ब्रह्मणः संसारसारत्वम् उक्तम्। [4]"उत तमादेशमप्राक्ष्यः। येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्" इत्यादिश्रुतौ [5]"येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके" इति कठोपनिषदि, अन्यत्र च [6] "शौनको ह वै महाशालः अङ्गिरसं विधिवदुपपन्नः पप्रच्छ" इत्येवं रूपेण सर्वास्वपि उपनिषत्सु सारभूतं तत्त्वं बहुशः विचिन्त्यमानम् अस्ति। एवं बहुशः विचिन्त्यमानं ब्रह्मस्वरूपमेव संसारे सारमस्ति परन्तु तथापि गृहीतं न भवति दुर्विज्ञेयत्वात्। तथा च [7] "कस्मात् सिद्धिः? तपसः" इत्यादिकारिकायां तावत् परमपुरुषार्थसिद्धिः कस्मात् भवतीति प्रश्ने सति गुरुः वदति,- तपसः इति।[8] मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः इत्युच्यते। मुण्डकोपनिषदि आत्मदर्शन-साधनविचारप्रसङ्गे [9]"सत्येन लभ्यस्तपसा ह्येषा आत्मा" इत्यादिना तपसः आत्मज्ञानसाधनत्वं प्रतिपादितं दृश्यते। तपसा इन्द्रियमनैकाग्रतया आत्मा लभ्यः स्यात्। तस्मात् तदनुकूलात् आत्मदर्शनाभिमुखीभावात्परमं साधनं तपः इत्युच्यते। एवं प्रकारेण शास्त्रोक्तान् विषयान् प्रश्नोत्तरमुखेन उक्त्वा अन्ततो गत्वा [10] "कः स्वप्ननिभो? जाग्रद्व्यवहारः, सत्यमपि च किं? ब्रह्म।।" इत्यादिकारिकया साक्षात् ब्रह्मणः सत्यत्वं प्रतिपाद्य [11] "किं पारमार्थिकं स्यात्? अद्वैतं" इत्यादिना च इदं जगत् मायामात्रं द्वैतमेव, पारमार्थिकं तु अद्वैतमेव [12] "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" [13] "एकधैवानुद्रष्टव्यम्" [14] "ब्रह्मैवेदं सर्वम्" [15] "आत्मैवेदं सर्वम्" इत्यादिश्रुतिभ्यः इत्युक्तम्। एतेन अवगम्यते यत् श्रीमच्छङ्कर-भगवत्पादैः अस्मिन् ग्रन्थे प्रस्थानत्रयाणां सारभूतं तत्वमेव प्रतिपादितम्।

लेखः

श्रीशङ्कराचार्यः ब्रह्मविषये उपनिषदः प्रामाण्यं प्रोक्तवान् । तथा च ब्रह्मसूत्राणाम्, उपनिषदां, भगवद्गीतायाः च भाष्यं लिखितवान् । आचार्यशङ्करः अनेकान् ग्रन्थानपि लिखितवान् तेषु विवेकचूडामणिः, उपदेशसाहस्री प्रपञ्चसारश्च प्रमुखाः सन्ति। तैः कारिकासमन्विताः लघुग्रन्थाः अपि विरचिताः। येषु प्रश्नोत्तररत्नमालिकेयं विद्वत्सु प्रसिद्धा आदरणीया च वर्तते। ग्रन्थेऽस्मिन् सप्तषष्ठि-कारिकाः विद्यन्ते। यथा प्रश्नोपनिषदि गुरुशिष्ययोः प्रश्नोत्तरप्रतिवचनपुरस्सरं विषयाणामुपस्थापनं दृश्यते, तथैव अस्मिन् ग्रन्थेऽपि गुरुशिष्यसंवादरूपेण प्रश्नप्रतिवचनरूपेण विषयाणां प्रतिपादनं दृश्यते।

प्राचीनभारतवर्षे अध्ययनस्य अध्यापनस्य च परम्परा गुरुशिष्ययोः अन्योन्याश्रयत्वम् उपस्थापयति। छात्राः गुरोराश्रमे उषित्वा पुत्रवत् विद्याभ्यासं कुर्वन्ति स्म। छात्रस्य आवास-भोजन-अध्ययनादिव्यवस्था गुरुकुले एव भवति स्म। अध्ययनस्य अन्ते आचार्यः छात्रम् उपदिशति स्म। एष एव दीक्षान्तोपदेशः आसीत्। दीक्षान्तभाषणे विद्याध्ययनं समाप्य छात्रैः गृहस्थाश्रमे किं करणीयं कथम् आचरणीयं, परिवारस्य, समाजस्य, राष्ट्रस्य कृते च किं करणीयम् इत्येतेषां विषयाणां चिन्तनं समावेशनञ्च दृश्यते। एवं शिष्याणां सन्मार्गे एव प्रवृत्तिः स्यात् इति सन्मार्गोपदेशपुरस्सरं शिष्येषु आगतस्य प्रश्नस्य समाधानरूपेण प्रश्नोत्तरक्रमेण उपदेशात्मिकाः कारिकाः सङ्कलिताः दृश्यन्ते ग्रन्थकारैः अस्मिन् ग्रन्थे।

[3] कारिकासंख्या ५, प्रश्नोत्तररत्नमालिका

[4] "उत तमादेशमप्राक्ष्यः। येनाश्रुतं श्रुतम्" (छान्दोग्योपनिषत् ६/१/३)

[5] "येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके" (कठोपनिषत् १/१/२०)

[6] "शौनको ह वै महाशालः अङ्गिरसं विधिवदुपपन्नः पप्रच्छ" (मुण्डकोपनिषत् १/१/३)

[7] कारिकासंख्या ४३, प्रश्नोत्तररत्नमालिका

[8] "मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः" (मो.ध. २५०। ४)

[9] "सत्येन लभ्यस्तपसा ह्येषा आत्मा" (मुण्डकोपनिषत् ३/१/५)

[10] कारिकासंख्या ५८, प्रश्नोत्तररत्नमालिका)

[11] कारिकासंख्या ६०, प्रश्नोत्तररत्नमालिका

[12] "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" (छान्दोग्योपनिषत् ६/२/१)

[13] "एकधैवानुद्रष्टव्यम्" (बृहदारण्यकोपनिषत् ४/४/२०)

[14] "ब्रह्मवेदं सर्वम्"(बृहदारण्यकोपनिषत् २/४/६)

[15] "आत्मैवेदं सर्वम्" (छान्दोग्योपनिषत् ७/२५/२)

अनुवन्धचतुष्टयनिरूपणम्

[16] "कः खलु नालंक्रियते दृष्टादृष्टार्थसाधनपटीयान्।
अमुया कण्ठस्थितया प्रश्नोत्तररत्नमालिकया ।।"

ग्रन्थारम्भे एव ग्रन्थस्य अनुबन्धचतुष्टयं प्रतिपाद्यते इति साम्प्रदायिकपरम्परा वर्तते। अनुबध्नन्ति अध्येतारम् इति अनुबन्धानि। अस्य प्रश्नोत्तररत्नमालिकाग्रन्थस्य प्रारम्भिकश्लोके आचार्यैः सम्प्रदायानुसारेण अस्य ग्रन्थस्य अनुबन्धचतुष्टयानि प्रतिपादितानि दृश्यन्ते।
अधिकारी कः इति चेत् प्रत्यक्षाप्रत्यक्षसाधनपटुत्वं यस्य अस्ति सः अधिकारी इति।अत्र प्रश्नोत्तररूपः विषयः उक्तः। प्रश्नप्रतिवचनरूपेण वेदान्तवाक्येभ्यः प्रतिपादितः जीवब्रह्मैक्यरूपः विषयः एव आचार्यैः प्रोक्तः। प्रयोजनं किमुक्तम् इति चेत् यः पटुः वर्तते अवश्यमेव अलङ्कृतः भविष्यति। प्रश्नोत्तररत्नमालिका तस्य कण्ठे आभरणरूपेण सम्मानरूपेण पुरष्काररूपेण वा उक्ता भविष्यति अर्थात् तस्य यत् युक्तिसिद्धं चातुर्यमस्ति तेन विषयस्य साक्षात्कारं जीवब्रह्मणोः ऐक्यरूपः यः विषयः तादृशं विषयं बुद्ध्वा मुक्तः भविष्यतीति प्रयोजनम् उक्तं भवति।सम्बन्धः कः इति चेत् बोध्यबोधकभावसम्बन्धः अत्र वर्तते। यतो हि, अयं साधनपटीयः वर्तते तस्मात् प्रश्नान् करोति उत्तराणि च लभते। अतः प्रश्नोत्तर इति प्रयोगदर्शनात् प्रश्नं करोति शिष्यः, उत्तरं प्रयच्छति गुरुः इति प्रश्नकर्ता बोध्यः प्रश्नसमाधाता गुरुः बोधकः भवति, तस्मात् अत्र बोध्यबोधकभावसम्बन्धः इत्युच्यते।
यथा प्रस्थानत्रयेषु उपनिषत्सु गुरुशिष्ययोः प्रश्नप्रतिवचनरूपेण विषयोपस्थापनं दृश्यते तथैव अस्मिन् ग्रन्थे अपि प्रश्नप्रतिवचनपुरस्सरं वेदान्तशास्त्रोक्तविषयाणाम् उपस्थानं दृश्यते। तस्मात् प्रश्नोत्तररत्नमालिकेयं गुरुशिष्यसंवादरूपा इत्यपि वक्तुं शक्यते। तथैव श्रीमद्भगवद्गीतायामपि कृष्णार्जुनसंवादे प्रश्नोत्तरक्रमेण तथोक्तविषयस्य उपस्थापनं दृश्यते। एवं सर्वत्रैव प्रश्नप्रतिवचनरूपेण विषयस्य उपस्थानं तज्ज्ञानेन च तत्तद्विषयसम्बद्धं फलञ्च प्राप्यते। तथैव प्रकृतग्रन्थेऽपि इत्यभिप्रायः।

गुरुस्वरूपम्
[17] "को गुरुः ? अधिगततत्त्वः शिष्यहितायोद्यतः सततम्।।"
को गुरुः इति प्रश्ने सति उच्यते,- अधिगततत्वः शिष्यहितायोद्यतः सततं सः गुरुः इति । सामान्यतया वदामश्चेत् यैः शास्त्रविषयकतत्वानि सम्यग्रूपेण अधिगतानि प्राप्तानि धारणया सः गुरुः। मुण्डकोपनिषदि प्रथममुण्डके उच्यते, - [18]"सः गुरुमेवाभिगच्छेत् श्रोत्रियं ब्रह्मनिष्ठम्" इति। यः गुरुः सः कीदृशः इति चेत् उच्यते श्रोत्रियः ब्रह्मनिष्ठः इति। [19] श्रोत्रियः नाम अध्ययनश्रुतार्थसम्पन्नः। किञ्च हित्वा सर्वकर्माणि केवले अद्वये ब्रह्मणि निष्ठा यस्य सोऽयं ब्रह्मनिष्ठः इत्युच्यते। यथा जपे निष्ठः जपनिष्ठः तद्वदत्रापि ब्रह्मणि निष्ठः ब्रह्मनिष्ठः इत्युच्यते। अपि च सः गुरुः आचार्यः शमदमदयादिसम्पन्नः इत्युच्यते। । एषु विषयेषु सुसम्पन्नः ब्रह्मनिष्ठः ब्रह्मविद् गुरुः। सः गुरुः एव शास्त्रोक्तानि तत्त्वानि सम्यगधिगतानि इत्यतः अधिगततत्त्वः गुरुः इत्युच्यते। किञ्च सः अधिगततत्त्वः गुरुः पुनः कीदृशः भवति इति चेत् सततं शिष्यहितायोद्यतः इति। अर्थात् शिष्यस्य हिताय आत्मोत्थानाय सर्वदा प्रयत्नशीलः भवति गुरुः।
यथा मुण्डकोपनिषदि प्रथममुण्डके उच्यते, - [20] "तस्मै स विद्वान्नुपसन्नाय सम्यक्प्रशान्तचित्ताय शमन्विताय। येनाक्षरं पुरुषं वेद सत्यं प्रोवाच तां तत्त्वतो ब्रह्मविद्याम्" इति। अर्थात्,- सः ब्रह्मविद् गुरुः समीपे उपसन्नाय उपरतदर्पादिदोषाय बाह्येन्द्रियोपरमेण च युक्ताय सर्वतः विरक्ताय शिष्याय यथाशास्त्रं तां ब्रह्मविद्यां तत्त्वतः ब्रूयात्। तदुक्तं श्रीशङ्करभगवत्पादैः, -

[16] कारिकासंख्या १ प्रश्नोत्तररत्नमालिका

[17] कारिकासंख्या २, प्रश्नोत्तररत्नमालिका

[18] "सः गुरुमेवाभिगच्छेत् श्रोत्रियं ब्रह्मनिष्ठम्" (मुण्डकोपनिषत्, १/२/१२)

[19] "श्रोत्रियः नाम अध्ययनश्रुतार्थसम्पन्नः। किञ्च हित्वा सर्वकर्माणि केवले अद्वये ब्रह्मणि निष्ठा यस्य सोऽयं ब्रह्मनिष्ठः" (ईशादि नौ उपनिषत्. गोरखपुर: गीताप्रेस, मुण्डकोपनिषत्, १/२/१२ पृष्ठम्- ४९१)

[20] "तस्मै स विद्वान्नुपसन्नाय सम्यक्प्रशान्तचित्ताय शमन्विताय। येनाक्षरम्" (मुण्डकोपनिषत् १/२/१३)

[21] "आचार्यस्याप्ययं नियमो यन्न्यायप्राप्तसच्छिष्यनिस्ता-रणमविद्यामहोदधे" । किञ्च [22] "आश्चर्यो वक्ता कुशलोस्य लब्धा" इत्यतः सः गुरुः आश्चर्यो वक्ता भवति। सः शिष्याय ब्रह्मविद्यामुपदिशति। आश्चर्यः अद्भुदेव अनेकेषु कश्चित् एव भवति सः गुरुः। यतो हि अवरेण हीनेन प्राकृतबुद्धिना मनुष्येण आत्मा न सम्यग्विज्ञातुं शक्यः। तस्मात् अनन्येन अपृथग्दर्शिना आचार्येण गुरुणा ब्रह्मात्मभूतेन प्रोक्तं ब्रह्मज्ञानं शिष्यस्य सम्यग्तत्त्ववोधं जनयति।

### ज्ञानस्य मोक्षहेतुत्वनिरूपणम्

[23] "किं मोक्षतरोर्बीजं? सम्यग्ज्ञानं क्रियासिद्धम्।।"

किं मोक्षतरोर्बीजम् इति प्रश्ने कृते गुरुः वदति, - सम्यग्ज्ञानं क्रियासिद्धम् इति। अर्थात् मोक्षतरोः मोक्षवृक्षस्य बीजं मुख्यहेतुः उपादानकारणं वा किम् ? तदा उच्यते सम्यग्दर्शनेन सहितं सम्यग्ज्ञानम् इति। तत् किं विशिष्टं इति चेत् क्रियासहितम् आचरणेन सहितम् इत्यर्थः। अतः सम्यगाचरणेन सहितं सम्यग्ज्ञानं मोक्षहेतुः इत्युच्यते।

सम्यगाचरणं नाम यस्मिन् आचरणे सति तदात्मविज्ञाने योग्यः अधिकृतः भवति। यत्परः संन्यासी ज्ञाननिष्ठः उच्यते। तदाचरणम् अमानित्वादिलक्षणविशिष्टं ज्ञानसाधनगणम् इत्युच्यते श्रीमद्भगवद्गीतायाम्, - [24]

"अमानित्वमदम्भित्वमहिंसाक्षान्तिरार्जवम्।
आचार्योपासनं शौचं स्थैर्यमात्मविनिग्रहः।।"

न केवलानि अमानत्वादीनि एव ज्ञानस्य अन्तरङ्गसाधनानि भवन्ति। अपि तु वैराग्यादीनि अपि तथा विधानि भवन्ति। तत्र दृष्टेषु अदृष्टेषु च इन्द्रियार्थेषु भोगेषु विरागः तस्य भावः वैराग्यम् इति। किञ्च आविर्भूतो गर्वोऽहंकारस्तदभावोऽपि ज्ञानहेतुः। अपि च अन्यस्मिन् सुखिनि दुःखिनि वा अहमेव सुखी दुःखी च जीवति मृते वा अहमेव जीवामि मरिष्यामि च इत्येतत् सर्वम् [25] अभिष्वङ्गः इत्युच्यते। एवं पुत्रदारगृहादिषु अभिष्वङ्गः न कर्तव्यः अर्थात् अनभिष्वङ्गः स्यात्। इत्येतानि ज्ञानसाधनानि ज्ञानसाधनाचरणानि भवन्ति। एवं प्रकारेण स्वाचरणे प्रतिफलितं क्रियासिद्धं सम्यगात्मज्ञानं मोक्षहेतुः मोक्षरूपवृक्षस्य बीजं भवति।

किञ्च ब्रह्मसूत्रस्य चतुर्थाध्यायस्य प्रथमपादे आवृत्त्यधिकरणे तत्र [26] "आत्मा वै अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" [27] " तमेव धीरः विज्ञाय प्रज्ञां कुर्वीत" इति एवंजातीयकाः श्रुतयः प्रत्ययावृत्तं सूचयन्ति। एवं आवृत्त्युपदेशेन तत्कृतेन च चित्तमलानां अपाकरणं भवति।एवं प्रकारेण वेदान्तवाक्यानां श्रोतव्यादिना पुरुषे आत्मतत्त्वज्ञानम् उपजायते यन्मोक्षहेतुः मोक्षरूपवृक्षस्य बीजं भवति।

### ब्रह्मणः संसारसारत्वम्

[28]"किं संसारे सारं ? बहुशोऽपि विचिन्त्यमानमिदमेव।"

शिष्यः स्वगुरुं पृच्छति यत् अस्मिन् संसारे सारं वास्तविकं तत्त्वं किमस्तीति। तदा गुरुः उक्तवान्,- बहुशोऽपि विचिन्त्यमानम् इदमेव अर्थात् अस्मिन् असारे संसारे ब्रह्म तत्त्वमेव सारभूतमस्ति। "उत तमादेशमप्राक्ष्यः। येनाश्रुतं श्रुतं भवत्यमतं मतमविज्ञातं विज्ञातम्" इत्यादिश्रुतौ "येयं प्रेते विचिकित्सा मनुष्येऽस्तीत्येके नायमस्तीति चैके" इति कठोपनिषदि, अन्यत्र च "शौनको ह वै महाशालः अङ्गिरसं विधिवदुपपन्नः पप्रच्छ" इत्येवं रूपेण सर्वास्वपि उपनिषत्सु सारभूतं तत्त्वं बहुशः विचिन्त्यमानम् अस्ति। एवं बहुशः विचिन्त्यमानं ब्रह्मस्वरूपमेव संसारे सारमस्ति परन्तु तथापि गृहीतं न भवति दुर्विज्ञेयत्वात्।

---

[21] "आचार्यस्याप्ययं नियमो यन्न्यायप्राप्तसच्छिष्यनिस्तारणमविद्यामहोदधे" "(मुण्डकोपनिषत् १/२/१३, पृष्ठम्- ४९१)

[22] "आश्चर्यो वक्ता कुशलोस्य लब्धा"(कठोपनिषत् १/२/७)

[23] कारिकासंख्या ३ प्रश्नोत्तररत्नमालिका

[24] "अमानित्वमदम्भित्वमहिंसाक्षान्तिरार्जवम्"(श्रीमद्भगवद्गीता ७/१३)

[25] "अभिष्वङ्गो नाम सक्तिविशेष एव अनन्यात्मभावनालक्षणः" श्रीमद्भगवद्गीता ९ /१३ (गोयेन्दका, श्रीहरिकृष्णदास. श्रीमद्भगवद्गीता. गोरखपुर: गीताप्रेस, 2010, पृष्ठम्- ३१९)

[26] "आत्मा वै अरे द्रष्टव्यः श्रोतव्यो मन्तव्यो निदिध्यासितव्यः" (बृहदारण्यकोपनिषत् ५/४/२)

[27] "तमेव धीरः विज्ञाय प्रज्ञां कुर्वीत" (बृहदारण्यकोपनिषत् ४/४/२१)

[28] कारिकासंख्या ५ प्रश्नोत्तररत्नमालिका)

श्रीकृष्णः अर्जुनाय वददि यत्,- इदम् आत्मज्ञानं अहं तुभ्यं विज्ञानसहितं स्वानुभवसंयुक्तं कथयिष्यामि अशेषतः। यदात्मज्ञानं ज्ञात्वा न अस्मिन् संसारे पुनर्ज्ञातव्यं किमपि पुरुषार्थसाधनं अवशिष्यते। तस्मात् ब्रह्म एव अस्मिन् जगति सारभूतं वस्तु [29] "ज्ञानं तेऽहं सविज्ञानमिदं वक्ष्याम्यशेषतः। यज्ज्ञात्वा नेह भूयोऽन्यज्ज्ञातव्यमवशिष्यते" इत्यादिस्मृतेः।

तपसः मोक्षसाधनत्वम्

"कस्मात् सिद्धिः ? तपसः"

शिष्यः स्वगुरुं पृच्छति यत्, - संन्यासिनां परमपुरुषार्थसिद्धिः कस्मात् भवतीति। तदा गुरुः वदति,- तपसः इति।मनसश्चेन्द्रियाणां च ह्यैकाग्र्यं परमं तपः इत्युच्यते। मुण्डकोपनिषदि आत्मदर्शनसाधनविचारप्रसङ्गे "सत्येन लभ्यस्तपसा ह्येषा आत्मा" इत्यादिना तपसः आत्मज्ञानसाधनत्वं प्रतिपादितं दृश्यते। तपसा इन्द्रियमनैकाग्रतया आत्मा लभ्यः स्यात्। तस्मात् तदनुकूलात् आत्मदर्शनाभिमुखीभावात्परमं साधनं तपः इत्युच्यते। तैत्तिरीयोपनिषदि अपि तृतीयवल्यां [30] "तपसा ब्रह्म विजिज्ञासस्व" इत्युक्तम्। तत्र मन्त्रे तपसः पुनःपुनः उपदेशः साधनातिशयत्वावधारणार्थः इत्युच्यते भाष्यकारैः। एतेन तपसः आत्मज्ञाने प्रधानसाधनत्वं सूच्यते। अतः यावता ब्रह्मणः स्वरूपं निरतिशयं लक्षणं विज्ञातं न भवति तावता तप एव साधनम्। तस्मात् मन्त्रे [31] "तपो ब्रह्मेति" इत्युक्तम्। तथा च तैत्तिरीये षष्ठे अनुवाके दृश्यते तपसा विशुद्धात्मा भृगुः प्राणादिषु ब्रह्मलक्षणम् अपश्यन् तपसा एव साधनेन शनैःशनैः आनन्दं ब्रह्म विज्ञातवान्। तस्मात् यो हि ब्रह्मविजिज्ञासुः अस्ति तेन बाह्यान्तः करणसमाधानलक्षणं परमं तपःसाधनम् अनुष्ठेयम्। अतः तपसः सिद्धिः इत्युच्यते। श्रीमद्भगवद्गीतायामपि उच्यते,- [32] "बहवो ज्ञानतपसा पूता मद्भावमागताः" इति। अर्थात् ज्ञानमेव परमात्मविषयं तपः तेन ज्ञानतपसा बहवः परां शुद्धिं गताः सन्तः ईश्वरभावं मोक्षं प्राप्ताः भवन्तीति।

अविद्यास्वरूपनिरूपणम्

[33] "का चाविद्या? यदात्मनोऽस्फूर्तिः।।"

का इयमविद्या इति प्रश्ने सति उच्यते, - यदात्मनः अस्फूर्तिः इति। आत्मनः अस्फूर्तिः स्फूर्त्यभावः प्रकाशाभावः इत्यर्थः। एवञ्च अविद्यया मायया अज्ञानेन आच्छादितत्वात् नित्यशुद्धबुद्धमुक्त-स्वभावस्य आत्मनः यत्स्वरूपं तन्न प्रकाश्यते।

अज्ञानेन कथं आत्मस्वरूपम् अच्छाद्यते इति चेत् उच्यते, - अध्यासवशात्। अज्ञानस्य शक्तिद्वयं वर्तते । वस्तुनि सच्चिदानन्दस्वरूपाद्वये ब्रह्मणि अज्ञानादिसकलजडसमूहस्य वस्तुनः अध्यारोपत्वात्। यथा असर्पभूतायां रज्जौ सर्पारोपः क्रियते। अध्यारोपे सति रज्जुः सर्पवदवभासते। तथैव प्रकृतेऽपि मनुष्यः पुत्रभार्यादिषु विकलेषु सकलेषु वा अहं एव विकलः सकलो वेति बाह्यविषयधर्मान् शुद्धे आत्मनि अध्यारोपयति। तथा च इन्द्रियधर्मान् मूकः काणः वधिरोऽहम् इति आत्मनि अध्यारोपयति। एवंप्रकारेण प्रत्यगात्मनि अनात्माध्यासः भवति। श्रीशङ्करभगवत्पादैः अध्यासभाष्ये उक्तम् [34] "एवं लक्षणम् अभ्यासं पण्डिताः अविद्येति मन्यन्ते" इति। भगवद्गीतायामपि [35] "अहङ्कारविमूढात्मा कर्ताहमिति मन्यते" इत्युक्तम्। कार्यकरणाभिमानी अविद्यया कर्माणि आत्मनि मन्यमानः तत्तत्कर्मणाम् अहं कर्ता इति मन्यते।

जाग्रद्व्यवहारस्य स्वप्नसदृशत्वम्

[36] "कः स्वप्ननिभो? जाग्रद्व्यवहारः, सत्यमपि च किं? ब्रह्म"

---

[29] श्रीमद्भगवद्गीता २/७

[30] "तपसा ब्रह्म विजिज्ञासस्व" ( तैत्तिरीयोपनिषत् ३/२/१)

[31] "तपो ब्रह्मेति " (तैत्तिरीयोपनिषत्, भृगुवल्ली १/२)

[32] "बहवो ज्ञानतपसा पूता मद्भावमागताः " (श्रीमद्भगवद्गीता १०/४)

[33] कारिकासंख्या ५६ प्रश्नोत्तररत्नमालिका

[34] "एवं लक्षणम् अभ्यासं पण्डिताः अविद्येति मन्यन्ते" (ब्रह्मसूत्रे अध्यासभाष्यम्)

[35] "अहङ्कारविमूढात्मा कर्ताहमिति मन्यते" (श्रीमद्भगवद्गीता २७/३)

[36] कारिका संख्या ५८ प्रश्नोत्तररत्नमालिका

पुनश्च प्रश्नः क्रियते यत्,- कः स्वप्ननिभः अर्थात् स्वप्नसदृशः कः इति। तदुच्यते,- जाग्रद्व्यवहारः इति। स्वप्नजाग्रदवस्थयोः मध्ये न कोऽपि भेदः वर्तते। उच्यते यत्,- स्वप्नदृश्यदेहादिवत् मायाविकृतदेहादिवच्च घटादिस्थानीयाः देहादिसंघाताः आत्ममायाविसर्जिताः एव भवन्ति। यथा स्वप्नावस्थायां घटादिपदार्थाः मिथ्याभूताः तथैव जाग्रदवस्थायां मायया अविद्यया संघाताः मिथ्याभूताः एव न पारमार्थिकाः भवन्ति। माण्डूक्यकारिकायां तदुक्तं श्रीगौडपादाचार्यैः, - [37] "संघाताः स्वप्नवत्सर्वे आत्ममायाविसर्जिताः" इति। किञ्च स्वप्नावस्थायां कृताः व्यवहाराः यथा जाग्रदवस्थापन्ने सति सर्वे मिथ्याभूताः इति ज्ञातं भवति। तथैव जाग्रदवस्थायां कृताः व्यवहाराः आत्मस्वरूपज्ञाने सति मिथ्याभूताः एव ते इति ज्ञातं भवति। अतः स्वप्नजाग्रदवस्थयोः न कोऽपि भेदः अस्ति।

ब्रह्मणः सत्यत्वम्

किं तर्हि सत्यभूतमस्ति इति चेत् उच्यते,- ब्रह्म इति। यद्रूपेण यन्निश्चितं तद्रूपं न व्यभिचरति तत् सत्यमिति। यद्रूपेण यन्निश्चितं तद्रूपं व्यभिचरति तदनृतम् इत्युच्यते। अतः विकारः अनृतः [38]"वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" इत्यादिश्रुतिभ्यः। किञ्च [39] "तत्सत्यमित्याचक्षते" [40] यदेष आकाश आनन्दो न स्यात्" इत्यादिश्रुतिभ्यः ब्रह्मणः सद्रूपत्वम् अवगम्यते। एवं ब्रह्मणः सत्त्वोक्त्यैव सत्यत्वम् उक्तं भवति।

ननु असदेव ब्रह्म घटादिवत् विशेषेण ग्रहणाभावात् इति चेत् उच्यते ब्रह्मणः आकाशादिकारणत्वात् ब्रह्म सदेव। एकस्मात् वस्तुनः किञ्चित् वस्तु जायते इति तस्य अस्तित्वं लोके दृश्यते एव। यथा घटादिपदार्थाणां कारणं मृदादिरिति तद्वत् आकाशादिभूतानां कारणं ब्रह्म भवति। न असतः जातं किञ्चित् गृह्यते लोके। यदि ब्रह्म असत् भवति तर्हि कार्यं गृह्यमाणमपि असदन्वितमेव तत् स्यात्। परन्तु तन्न दृश्यते [41]"कथमसतः सज्जायेत" इत्यादिश्रुत्या। अतः ब्रह्म सद्वस्तु एव।

किञ्च यदक्षरं ब्रह्म तत् अक्षरणाद् अक्षयत्वाच्च परमार्थस्वाभाव्यात् अव्ययं सत्यम् इत्युच्यते [42] "येनाक्षरं पुरुषं वेद सत्यम्" इत्यादिश्रुतेः। उक्तञ्च श्रीशङ्करभगवत्पादैः माण्डूक्यकारिकाभाष्ये [43] "सत्यानाम् एतत् उत्तमं सत्यं यस्मिन् सत्यस्वरूपे ब्रह्मणि अणुमात्रमपि किञ्चिन्न जायते" इति ।

प्रपञ्चस्य मिथ्यात्वम्

[44] "किं मिथ्या? यद्विद्यानाश्यं"

शिष्यः पृच्छति यत्, - किं मिथ्या इति। तदा गुरुः वदति, - यत् विद्यया नाश्यमस्ति तन्मिथ्या इति। आशयः अयमस्ति, यद्रूपेण यन्निश्चितं वर्तते तद्रूपं केनापि प्रकारेण व्यभिचरति चेत् तन्मिथ्या अनृतम् इत्युच्यते। अत्र विद्यया नाम ब्रह्मविद्यया ब्रह्मज्ञानेन इत्यर्थः। एवञ्च ब्रह्मज्ञानेन अज्ञानं निवर्त्यते, अज्ञानस्य नाशो भवति। आत्मविज्ञानेन अज्ञानस्य नाशे सति अज्ञानजनितकार्यस्य अस्य प्रपञ्चस्य नाशो भवति। अतः प्रपञ्चोऽयं मिथ्या इत्युच्यते।

कथं ब्रह्मविद्यया अज्ञानस्य निवृत्तिर्भवति इति चेत् उच्यते,- यथा अन्धकारपतितरज्जुदर्शकस्य रज्जुविषयकज्ञानं सर्पाकारपरिणतिमासादयति किन्तु सावहितिरज्जुदर्शनानन्तरं तदज्ञाननिवृत्तौ सर्पभ्रान्तिः न तिष्ठति। तथैव शुद्धे आत्मनि कर्तृत्वभोक्तृत्वाद्यहम्ममाभिमानस्य अध्यारोपः दृश्यते। अयमध्यासः मिथ्याप्रत्ययरूपः । ततः आत्मैकत्वविद्यया ब्रह्मज्ञानेन आत्मप्रकाशानन्तरं ब्रह्मरूपवस्तुनि ज्ञाते सति जगद्रूपावस्तुभ्रान्तिः निवर्त्यते। ब्रह्मरूपसत्यवस्तुनि प्रपञ्चस्य प्रतीतिः मिथ्या। स्वस्वकारणे सम्पूर्णसांसारिकप्रपञ्चस्य लये

[37] "संघाताः स्वप्नवत्सर्वे आत्ममायाविसर्जिताः" (माण्डूक्यकारिका १०/३अद्वैतप्रकरणम्)

[38] "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" (छान्दोग्योपनिषत् ६/१/४)

[39] "तत्सत्यमित्याचक्षते" (तैत्तिरीयोपनिषत् २/६/१)

[40] "यदेष आकाश आनन्दो न स्यात्" ( तैत्तिरीयोपनिषत् २/७/१)

[41] "कथमसतःसज्जायेत" (छान्दोग्योपनिषत् ६/२/२)

[42] "येनाक्षरं पुरुषं वेद सत्यम्" (मुण्डकोपनिषत् १/२/१३)

[43] "सत्यानाम् एतत् उत्तमं सत्यं यस्मिन् सत्यस्वरूपे ब्रह्मणि अणुमात्रमपि किञ्चिन्न जायते" ("माण्डूक्यकारिका-भाष्यम् ४८/३ अद्वैतप्रकरणम्)

[44] कारिकासंख्या ५९ प्रश्नोत्तररत्नमालिका)

सति पूर्वोक्तमिथ्याप्रतीतिः नश्यति। केवलं सत्यं ज्ञानमनन्तं ब्रह्म सच्चिदानन्दम् अद्वयं ब्रह्ममात्रम् अवशिष्यते [45]"एकमेवाद्वितीयम्" [46]"यत्र नान्यत्पश्यति" [47]सर्वमात्मैवाभूत् "इत्यादिश्रुतिभ्यः। अपि च [48] "यत्र हि द्वैतमिव भवति" [49] "मृत्योः स मृत्युमाप्नोति" [50]"अन्योऽसावन्योऽहमस्मि" इत्यादिश्रुतिभ्यः द्वैतस्य मिथ्यात्वम् उच्यते।

## द्वैतस्य कल्पितत्वम्

[51] "किं कल्पितं ? द्वैतम्"

मायावशादेव द्वैतप्रपञ्चस्य प्रतीतिः भवति। तस्मात् किं कल्पितमिति प्रश्ने सति उच्यते,- द्वैतम् इति। अद्वैतस्य अभावः द्वैतम् इति वक्तुं शक्यते। अयं द्वैतभावः कल्पित एव वर्तते। कुतः द्वैतस्य कल्पितत्वम् इति चेत् उच्यते,- परमार्थतः अद्वैते ब्रह्मणि मायया अविद्यया द्वैतमिव भिन्नम् इव वस्त्वन्तरम् आत्मनः उपलक्ष्यते।

यदि अत्र शक्ङा क्रियते यत्,- उपमीयमानत्वात् द्वैतस्य पारमार्थिकत्वम् इति। तदोच्यते, इयं शङ्कां न भवत्येव। यतो हि [52] "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्" "एकमेवाद्वितीयम्" "आत्मैवेदं सर्वम्" इत्यादिश्रुतिभ्यः ब्रह्मणः एव परमार्थत्वोपपत्तेः। तस्मात् न द्वैतस्य पारमार्थिकत्वोपपत्तिः। एवञ्च यत्र द्वैतमिव भवति तत्र इतरः असौ परमात्मनः खिल्यभूत आत्मा अपरमार्थः इत्युच्यते चन्द्रादेः उदकचन्द्रादि-प्रतिविम्ब इव इति। द्वैतस्य कल्पितत्वात् ब्रह्मविद्यया तस्य नाशे सति आत्मानं व्यतिरिच्य सर्वस्यापि अभावः भवति। अतः उच्यते तस्मिन् काले ब्रह्मविदः सर्वं नामरूपादिविकारजातम् आत्मनि एव प्रविलापितं भवति "सर्वमात्मैवाभूत् तत्केन कं पश्येत्" इत्यादिश्रुतेः। तस्मात् किं कल्पितमिति चेत् द्वैतमेव।

## अद्वैतस्य पारमार्थिकत्वम्

[53]"किं पारमार्थिकं स्यात्? अद्वैतं, चाज्ञाता कुतोऽनादिः।" पृच्छति यत् किं पारमार्थिकं स्यात् इति। तदा गुरुः वदति,- अद्वैतम् इति। द्विधा इतं द्वितं तस्य भावः द्वैतम् इति। न द्वैतम् अद्वैतम् इति। द्वैतं नानात्वं कल्पितं भेदज्ञानम् इत्युच्यते। अद्वैतं हि पारमार्थिकं सत्यमित्युच्यते [54] "अद्वैतं परमार्थतो हि द्वैतं तद्भेद उच्यते" इत्यादिकारिकया। तस्य अद्वैतस्य कार्यं भवति इदं द्वैतम् "एकमेवाद्वितीयम्" "तत्तेजोऽसृजत" इत्यादिश्रुतेः।

ननु द्वैतमपि अद्वैतवत् परमार्थसत् इति आशङ्का स्यात्। तत्रोच्यते,- यत्परमार्थसत् अद्वैतम् अस्ति तत् मायया अज्ञानवशाद् तैमिरिकानेकचन्द्रवत् विद्यते। परन्तु तन्न परमार्थतः भिद्यते आत्मनः निरवयवत्वात्। यथा मृद्घटादिभेदैः सावयवपदार्थाः भिद्यन्ते न तथा। तस्मात् निरवयवम् अजं न केनचिदपि प्रकारेण भिद्यते इत्यभिप्रायः। अजमद्वयम् आत्मतत्त्वं माययैव भिद्यते न परमार्थतः [55]"मायया भिद्यते ह्येतन्नान्यथाजं कथञ्चन" इत्यादिकारिकया। अतः इदं जगत् मायामात्रं द्वैतम् उच्यते। पारमार्थिकं तु अद्वैतमेव "सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयम्" "एकधैवानुद्रष्टव्यम्", "ब्रह्मवेदं सर्वम्", "आत्मैवेदं सर्वम्" इत्यादिश्रुतिभ्यः।

## अज्ञानस्य अनादित्वम्

ततश्च पृच्छति अज्ञता अज्ञानत्वं कुतः इति। तदोच्यते, - अनादिरस्ति इदम् अज्ञानम् इति। योऽयं संसारी जीवः वर्तते सः अन्यथाग्रहणलक्षणेन अनादिकालप्रवृत्तेन मायालक्षणेन ममायं पिता पुत्रोऽयम्, अहमेषां स्वामी सुखी दुःखी, क्षायितोऽहम् अनेन वर्धितश्च अनेन

---

[45] "एकमेवाद्वितीयम् "(छान्दोग्योपनिषत् ६/२/१)

[46] "यत्र नान्यत्पश्यति "(छान्दोग्योपनिषत् ७/२४/१)

[47] "सर्वमात्मैवाभूत् "(बृहदारण्यकोपनिषत् ४/५/१५)

[48] "यत्र हि द्वैतमिव भवति"(बृहदारण्यकोपनिषत् २/४/१४)

[49] "मृत्योः स मृत्युमाप्नोति" ( कठोपनिषत् २/१/१०)

[50] "अन्योऽसावन्योऽहमस्मि "( बृहदारण्यकोपनिषत् १/४/१०)

[51] कारिकासंख्या ५९ प्रश्नोत्तररत्नमालिका

[52] "वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् " (छान्दोग्योपनिषत् ६/१/४)

[53] कारिकासंख्या ६० प्रश्नोत्तररत्नमालिका

[54] "अद्वैतं परमार्थतो हि द्वैतं तद्भेद उच्यते" (माण्डूक्यकारिका १८/३ अद्वैतप्रकरणम्)

[55] "मायया भिद्यते ह्येतन्नान्यथाजं कथञ्चन" (माण्डूक्यकारिका १९/३ अद्वैतप्रकरणम्)

इत्येवंप्रकारेण सुप्तः इत्युच्यते [56] "अनादिमायया सुप्तो यदा जीवः प्रबुध्यते" इत्यादिकारिकया। स स्वाभाविकोऽनादिः वर्तते। व्यवहारानादितया तत्कारणस्य अध्यासस्य अनादित्वम्। तेन अध्यासकारणस्य अज्ञानस्य अनादित्वोपपत्तिः। उक्तञ्च श्रीशङ्करभगवत्पादैः [57] "अहमिदं ममेदम् इति नैसर्गिकोऽयं लोकव्यवहारः" इति। भगवद्गीतायां च [58] "मम कर्म, अहं कर्तामुष्मै फलायेदं कर्म करिष्यामि" इति इयम् अविद्या अनादिकालप्रवृत्ता" इत्युक्तम्। एवञ्च मायायाः अनादिकालतया प्रवृत्तित्वात् तत्कार्यभूतः अयं संसारवृक्षः अव्ययः इत्युच्यते [59] "ऊर्ध्वमूलमधः शाखमश्वत्थं प्राहुरव्ययम्" इत्यादिस्मृतेः।

## उपसंहारः

श्रीशङ्करभगवत्पादैः प्रस्थानत्रयभाष्ये यत्प्रतिपाद-यितुम् इष्टं तत् सामान्यैः अपि यथावगन्तुं शक्यं तथा मया वक्तव्यम् इति धिया प्रश्नोत्तरक्रमेण स्तोत्राणि विरचितानि। स्तोत्रेषु विद्यमानं तत्वं प्रस्थानत्रयेषु विद्यते। प्रस्थानत्रयेषु उक्तं तत्वं स्तोत्रेषु च विद्यते। तर्हि का अनयोः समन्वयप्रदर्शनेन आवश्यकता इति शङ्का जायते।कदाचित् भाष्येषु एकं तत्वम् प्रोक्तं स्तोत्रग्रन्थेषु अन्यत्प्रोक्तम् इति संशयो जायेत मन्दबुद्धीनाम्। स च भ्रमः निवर्तनीयः इति हेतोः स्तोत्रे प्रस्थानत्रयप्रतिपादितविषयाणां कथं समन्वयो भवति इति प्रदर्शनम् एतस्य कार्यकलापस्य मुख्यं प्रयोजनम् पश्यामि। अपरं सरलतया अधिगमः इति। शास्त्रस्य अवगमनं सरलतया भवति चेत् किमर्थं कष्टे पतनीयम्। भाष्यादिकं यावत् वा श्रेष्ठं तत्वं प्रतिपादयति तथापि सामान्यानां बोधनार्थम् आवश्यकम् अस्ति इति द्वितीयं प्रयोजनम् अत्र चिन्तितम्।

[56] "अनादिमायया सुप्तो यदा जीवः प्रबुध्यते " (माण्डूक्यकारिकाभाष्यम् १६/१ आगमप्रमाणम्)

[57] "अहमिदं ममेदम् इति नैसर्गिकोऽयं लोकव्यवहारः" (ब्रह्मसूत्रे अध्यासभाष्यम्)

[58] "मम कर्म, अहं कर्तामुष्मै फलायेदं कर्म करिष्यामि" इति इयम् अविद्या अनादिकालप्रवृत्ता "(श्रीमद्भगवद्गीता ६६/२ श्लोकभाष्यम्)

[59] "ऊर्ध्वमूलमधःशाखमश्वत्थं प्राहुरव्ययम्" (श्रीमद्भगवद्गीता १/१५)

## सन्दर्भ ग्रन्था


1. विश्वरूपानन्द, स्वामी. वेदान्तदर्शनम् (१-४) कोलकाता: उद्बोधनकार्यालयः, 2008.
2. गिरि, स्वामी विद्यानन्द. श्रीमद्भगवद्गीता. हृषीकेश: कैलासविद्याप्रकाशन, 2000.
3. गिरि, आनन्द & स्वामी विद्यानन्द गिरि. बृहदारण्यकोपनिषत्. ऋषिकेश (उत्तराखण्ड): श्री कैलासविद्या प्रकाशन, 2018.
4. छान्दोग्योपनिषत्. गोरखपुर: गीताप्रेस.
5. ईशादि नौ उपनिषत्. गोरखपुर: गीताप्रेस.
6. गिरि, आनन्द. उपनिषद्भाष्यम् (१). वाराणसी: श्रीदक्षिणामूर्तिमठ प्रकाशन, 2018.
7. गोयेन्दका, श्रीहरिकृष्णदास. श्रीमद्भगवद्गीता. गोरखपुर: गीताप्रेस, 2010.
8. अद्वैतशारदा. दक्षिणाम्नाय श्री शारदापीठम्, https://advaitasharada.sringeri.net.